२९ पाठस्य अवशिष्टांशः

जनान्तिकम् - 'त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योऽन्यामन्त्रणं यत्स्यात् तज्जनान्ते जनान्तिकम् ॥'

यः कश्चित् अर्थो यस्माद् गोपनीयः तस्यान्तरत ऊर्ध्वं सर्वाङ्गुलिनामिता नामिकं त्रिपताकं लक्षणं करं कृत्वाऽन्येन सह मन्त्र्यते तत् जनान्तिकम् ।

यथा शकुन्तले -

'शकुन्तला - हला ! पेक्खह णलिणीपत्तन्तरिदं वि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि - दुक्करं अहं करोमि त्ति ।'

आकाशभाषितम् —

'किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवानुक्तमप्यर्थं तस्मादाकाशभाषितम् ॥' इति

अभिनये पात्रं विना अनभ्यन्तरेण अकथितमपि विषयं श्रुत्वेव = श्रवणाभिनयं कृत्वा 'किं ब्रवीषि' इति यद् अभिधीयते तद् आकाशे शून्ये लक्ष्य पात्राभावात् भाषितम् 'आकाशभाषितम्' स्यात् ।

यथा-

स्वप्नवासवदत्ते - ~~चेटि~~ - चेटी - कुञ्जरिए कुञ्जरिए ! कहिं वडिं ? भट्टिदारिआ पदुमावदी ? किं भणासि 'एसा भट्टिदारिआ माहवीलदा मंडवस्स पस्सदो कंदुएण कीलदि' त्ति । जाव भट्टिदारिअं उवसप्पामि ।'

इति

उपेन्द्र झा
19/9/20
एसो०प्रो० साहित्य
रा०आ०सं० महावि०
बुलन्देला, दरभंगा

Sep 19

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## अलङ्कार विवेचनम्

तुल्ययोगिता प्रतिवस्तूपमा अलङ्कारयोः विवेचनम्।

तुल्ययोगिता – प्रस्तुतानाम् अप्रस्तुतानां च पदार्थानां यत्र गुणक्रियारूपैक धर्मे अभिसम्बन्धो भवेत् तत्र ~~तुल्यता~~ तुल्ययोगिता नामकोऽलंकारो भवति उक्तञ्च साहित्य दर्पणे –

"पदार्थानां प्रस्तुतानामन्येषां च यदा भवेत्।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥" इति

उदाहरणं यथा –

'तदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते।
मालतीशशभृल्लेखाकदलीनां कठोरता ॥'

अत्र नायिकाङ्गमार्दवे वर्णनीयत्वेन प्रस्तुते अप्रस्तुतानां मालत्यादीनां कठोरता रूपैक गुणात्मक धर्माभिसम्बन्धात् तुल्ययोगिता अलङ्कारोऽस्ति।

प्रतिवस्तूपमा –

"ययोर्द्वयोर्वाक्यार्थयोः सादृश्यं प्रतीयमानं भवेत्, तत्र यदि अभिन्नोऽपि साधारणो धर्मो गुणः क्रिया वा भिन्नतया निर्दिश्यते सा प्रतिवस्तूपमा। प्रतिवस्तु = प्रतिपदार्थम्, उपमा = सादृश्यम्। प्रति प्रतीयमाना यत्र सा प्रतिवस्तूपमा नामकोऽलङ्कारो भवेत्। उक्तञ्च साहित्य दर्पणे –

'प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥' इति

उदाहरणं यथा –

'धन्यासि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥'

अत्र समाकर्षणम् अपि उत्तरलीकरणं च क्रियैकैव पौनरुक्त्यनिरासाय भिन्न-वाचकतया निर्दिष्टेति प्रतिवस्तूपमा नामकोऽलङ्कारः इति

उपेन्द्र झा
1/9/20
स्ना० प्र० साहित्य
रा० उ० सं० महावि०
सुकौना, मधुबनी

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या।

---

"रम्यान्तरः कमलिनीहरितैः सरोभिः
छायाद्रुमैर्नियमितार्कमरीचितापः।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः॥"

प्रस्तुतोऽयं श्लोकः 'पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः' इत्युक्ति दिशा कविमण्डल मार्तण्डायमानेन अप्रतिम प्रातिभ सम्पत्तिभासमानेन, कविता वनिता विलासेन महाकविना कालिदासेन विरचितस्य निखिलभारत भूतलस्य काव्यकला समन्वितस्य सर्वेषां नवनवस्य नाट्य साहित्य शिरोरत्नभूतस्य संस्कृत साहित्ये निबन्धित स्वरूपात् अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति।

श्लोकेऽस्मिन् शकुन्तलायाः पतिगृहं प्रेषयन् महर्षि कण्वः स्वकीयाशीर्वचनैः तस्याः मार्गे मङ्गलकामनां कुर्वन् कथयति।

अन्वयः - अस्याः पन्थाः कमलिनीहरितैः सरोभिः रम्यान्तरः छायाद्रुमैः नियमितार्कमरीचितापः कुशेशयरजोमृदुरेणुः शान्तानुकूलपवनः शिवश्च भूयात्।

अस्याः = शकुन्तलायाः पन्थाः = मार्गः कमलिन्याः = नलिन्याः हरितैः = हरितवर्णैः सरोभिः = सरोवरैः रम्यं = रमणीयम् अन्तरं = मध्यभागं यस्य सः एवं भूतः छाया प्रधानं येषां तैः छायाद्रुमैः = छायाविशिष्टैः वृक्षैः नियमितः = संयमितः नियन्त्रितः अर्कस्य = सूर्यस्य मरीचीनां = किरणानां तापः = घर्मतापो यस्मिन् सः, कुशेशयानां = कमलानां रजोभिः = परागैः मृदुः = कोमलः रेणुः = धूलिः यस्मिन् सः शान्तः = मन्दः मन्दः प्रवहमानः अनुकूलः = सुखकरः पवनः = वायुः यस्मिन् सः शिवः कल्याणकारी च भूयात् = स्यात्।

अत्र शकुन्तलायाः मार्गे शिवत्वरूपकार्यस्य नैकविधकारणानां प्रतिपादनेन समुच्चयालङ्कारः। वसन्ततिलका वृत्तम् - उक्ता वसन्ततिलका तभजा जगौ गः इति लक्षणात्।

उपेन्द्र झा
17/4/20
सहा० प्रो० साहित्य
रा०उ०सं० महाविद्यालय
[illegible]

शास्त्री द्वितीय खण्डस्य कृते (साहित्य वर्ग:)

षष्ठ: परिच्छेद: नाट्योक्तीनां परिचय: ।

---

स्वगतम् - 'अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।'
अर्थात् यद् वाक्यम् अन्यस्य श्रवणायोग्यं तदिह दृश्यकाव्ये स्वस्मिन् आत्मन्येव गतं = प्रत्यक्षत्वेन स्थितमिति स्वगतं मतम् । अर्थात् तद्वाक्यं पात्रोऽन्यं न वदति किन्तु स्वमनस्येव इत्थं वदति येन सामाजिका: तच्छृण्वन्ति । 'आत्मगतम्' इत्यस्यैव नामान्तरम् अस्ति स्वगतम् ।

यथा- स्वप्नवासवदत्ते - 'वासवदत्ता - (आत्मगतम्) एदं पि मए कत्तव्वं आसी । अहो अकरुणा खु इस्सरा ।'

प्रकाशम् - 'सर्वश्राव्यं प्रकाशं स्यात् ।' इति
यद् वस्तु सर्वै: श्रवणयोग्यं तत् सर्वेषु प्रकाशते प्रत्यक्षीभवतीति 'प्रकाशम्' कथ्यते ।
यथा- स्वप्नवासवदत्ते - 'वासवदत्ता - हला ! किं दिट्ठो जामादुओ ?' इति

अपवारितम् - 'तद्भवेदपवारितम् । रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते ।' इति ।
यद् गोपनीयं वस्तु एकस्मात् पात्रात् सङ्कोच्य स्थानान्तरं गत्वा परस्य जनस्य समक्षे प्रतिपाद्यते तद् अपवारितम् इत्युच्यते ।

यथा- स्वप्नवासवदत्ते - 'राजा - अये पद्मावती (अपवार्य) वसन्तक ! किमिदम् ।

क्रमश: